

ॐ

## श्रीसदाशिवब्रह्मेन्द्रैर्विरचितानि

# ॥ कीर्तनानि ॥

नवरोज् रागः आदितालम्

सर्वं ब्रह्ममयम् , रे रे
सर्वं ब्रह्ममयम् ॥

किं वचनीयम् , किमवचनीयम्
किं रचनीयम् , किमरचनीयम् १

किं पठनीयम् , किमपठनीयम्
किं भजनीयम , किमभजनीयम् २

किं बोद्धव्यम् , किमबोद्धव्यम्
किं भोक्तव्यम् , किमभोक्तव्यम् ३

सर्वत्र सदा हंसध्यानम्
कर्तव्यं भो मुक्तिनिदानम् ४



नवरोज् रागः आदितालम्

मानस संचर रे, ब्रह्मणि
मानस संचर रे ॥

श्रीरमणीकुचदुर्गविहारे
सेवकजनमन्दिरमन्दारे १

मदाशिखिपिञ्छालंकृतचिकुरे
महनीयकपोलविजितमुकुरे २

परमहंसमुखचन्द्रचकोरे
परिपूरितमुरलीरवधारे ३

नवरोज्रागः आदितालम्

**तद्वज्जीवत्वम्, ब्रह्मणि**
**तद्वज्जीवत्वम् ॥**

यद्वत्तोये चन्द्रद्वित्वम्
यद्वन्मुकुरे प्रतिबिम्बत्वम् १

स्थाणौ यद्वन्नररूपत्वम्
भानुकरे यद्वत्तोयत्वम् २

शुक्तौ यद्वद्रजतमयत्वम्
रज्जौ यद्वत्फणिदेहत्वम् ३

परमहंसगुरुणाद्वयविद्या
फणिता धिक्कृतमायाविद्या ४

ॐ



कल्याणी रागः आदितालम्

**पूर्णबोधोऽहम्, सदानन्द-**
**पूर्णबोधोऽहम् ॥**

वर्णाश्रमाचारकर्मातिदूरोऽहम्
स्वर्णवदाखिलविकारगतोऽहम्

प्रत्यगात्माहं प्रविततसत्यघनोऽहम्
श्रुत्यन्तशतकोटिप्रकटितब्रह्माहम्
नित्योऽहमभयोऽहमद्वितीयोऽहम् १

साक्षिमात्रोऽहं प्रगलितपक्षपातोऽहम्
मोक्षस्वरूपोऽहमोंकारगम्योऽहम्
सूक्ष्मोऽहमनघोऽहमद्भुतात्माहम् २

स्वप्रकाशोऽहं विभुरहं निष्प्रपञ्चोऽहम्
अप्रमेयोऽहमचलोऽहमकलोऽहम्
निष्प्रतर्क्याखण्डैकरसोऽहम् ३

अजनिर्ममोऽहं बुधजनभजनीयोऽहम्
अजरोऽहममरोऽहममृतस्वरूपोऽहम्
निजपूर्णमहिमनि निहितमहितोऽहम् ४

निरवयवोऽहं निरुपमानिष्कलङ्कोऽहम्
परमशिवेन्द्रश्रीगुरुसोमसमुदित-
निरवधिनिर्वाणसुखसागरोऽहम् ५



मध्यमावती रागः झम्पतालम्

आनन्दपूर्णबोधोऽहम्, सतत-
मानन्दपूर्णबोधोऽहमजरोऽहम् ॥

प्रत्यगद्वैतसारोऽहं सकलश्रुत्यन्ततन्त्र-
विदितोऽहममृतोऽहं मत्यनन्तरभावितोऽहम्
विदितनित्यनिष्कलरूपनिर्गुणपदोऽहम् १

साक्षिचिन्मात्रगात्रोऽहं परममोक्षसाम्राज्या-
धिपोऽहममृतोऽहं पक्षपातातिदूरोऽह-
मधिकसूक्ष्मोऽहमनवधिकसुखसागरोऽहम् २

स्वप्रकाशैकसारोऽहं सदहमप्रपञ्चात्म-
भावोऽहमभयोऽहं निष्प्रतर्क्योऽहम-
मरोऽहं चिदहमप्रमेयाख्यमूर्तिरेवाहम् ३

शंकराभरणरागः    मिश्रतालम्

आनन्दपूर्णबोधोऽहं सच्चि-
दानन्दपूर्णबोधोऽहं शिवोऽहम् ॥

सर्वात्मचरोऽहं
परिनिर्वाणनिर्गुणनिखिलात्मकोऽहम्
गीर्वाणवर्यानतोऽहं
कामगर्वनिर्वापणधीरतरोऽहम्  १

सत्यस्वरूपापरोऽहं
वरश्रुत्यन्तबोधितसुखसागरोऽहम्
प्रत्यगभिन्नपरोऽहं
शुद्धमन्तरहितमायातीतोऽहम्  २



अवबोधरससागरोऽहं
व्योमपवनादिपञ्चभूतातिदूरोऽहम्
कविवरसंसेव्योऽहं
घोरभवसिन्धुतारकपरमसूक्ष्मोऽहम्  ३

बाधितगुणकलनोऽहं
बुद्धशोधितसमरसपरमात्माऽहम्
साधनजातातीतोऽहं
निरुपाधिकनिःसीमभूमानन्दोऽहम्  ४

निरवयवोऽहमजोऽहं
निरुपममहिम्नि निहितमहितोऽहम्
निरवधिसत्त्वघनोऽहं
धीरपरमशिवेन्द्रश्रीगुरुबोधितोऽहम्  ५

नाथनामक्रियारागः    आदितालम्

## ब्रह्मैवाहं किल, सद्गुरुकृपया
## ब्रह्मैवाहं किल ॥

ब्रह्मैवाहं किल गुरुकृपया
चिन्मयबोधानन्दघनं तत् १

अत्यन्तैकनिरूपितमतुलं
सत्यसुखाम्बुधिसमरसमनघम् २

कर्माकर्मविकर्मविदूरं
निर्मलसंविदखण्डमपारम् ३

निरवधिसत्तास्पदपदमजरं
निरुपममहिमनि निहितमनीहम् ४



आशापाशविनाशनचतुरं
कोशपञ्चकातीतमनन्तम् ५

कारणकारणमेकमनेकं
कालकालकलिदोषविहीनम् ६

अप्रमेयपदमखिलाधारं
निष्प्रपञ्चनिजनिष्क्रियरूपम् ७

स्वप्रकाशशिवमद्वयमभयम्
निष्प्रतर्क्यमनपायमकायम् ८

तोडिरागः आदितालम्

**खेलति पिण्डाण्डे, भगवान्**
**खेलति पिण्डाण्डे ॥**

हंसः सोऽहं हंसः सोऽहं
हंसः सोऽहं सोऽहमिति १

परमात्माहं परिपूर्णोऽहं
ब्रह्मैवाहमहं ब्रह्मेति २

त्वक्चक्षुःश्रुतिजिह्वाघ्राणे
पञ्चविधप्राणोपस्थाने ३

शब्दस्पर्शरसादिकमात्रे
सात्त्विकराजसतामसमित्रे ४



बुद्धिमनश्चित्ताहंकारे
भूजलतेजोगगनसमीरे ५

परमहंसरूपेण विहर्ता
ब्रह्माविष्णुरुद्रादिककर्ता ६

कल्याणीरागः आदितालम्

**भज रे गोपालम्, मानस**
**भज रे गोपालम् ॥**

भज गोपालं भजितकुचेलम्
त्रिजगन्मूलं दितिसुतकालम् १

आगमसारं योगविचारम्
भोगशरीरं भुवनाधारम् २

कदनकठोरं कलुषविदूरम्
मदनकुमारं मधुसंहारम् ३

नतमन्दारं नन्दाकिशोरम्
हतचाणूरं हंसविहारम् ४



जज्झोटिरागः आदितालम्

**पिब रे रामरसम्, रसने**
**पिब रे रामरसम् ॥**

दूरीकृतपातकसंसर्गम्
पूरितनानाविधफलवर्गम् १

जननमरणभयशोकविदूरम्
सकलशास्त्रनिगमागमसारम् २

परिपालितसरसिजगर्भाण्डम्
परमपवित्रीकृतपाषण्डम् ३

शुद्धपरमहंसाश्रमगीतम्
शुकशौनककौशिकमुखपीतम् ४

**चिन्ता नास्ति किल, तेषां**
**चिन्ता नास्ति किल ॥**

शमदमकरुणासंपूर्णानाम्
साधुसमागमसंकीर्णानाम् १

कालत्रयजितकंदर्पाणाम्
खण्डितसर्वेन्द्रियदर्पाणाम् २

परमहंसगुरुपदचित्तानाम्
ब्रह्मानन्दामृतमत्तानाम् ३





**स्थिरता न हि न हि रे, मानस**
**स्थिरता न हि न हि रे ॥**

तापत्रयसागरमग्नानाम्
दर्पाहंकारविलग्नानाम् १

विषयपाशवेष्टितचित्तानाम्
विपरीतज्ञानविमत्तानाम् २

परमहंसयोगविरुद्धानाम
बहुचञ्चलतरसुखसिद्धानाम् ३

आनन्दभैरवी रागः आदितालम्

न हि रे न हि शङ्का काचि-
न्न हि रे न हि शङ्का ॥

अजमक्षरमद्वैतमनन्तम्
ध्यायन्ति ब्रह्मपरं शान्तम् १

ये त्यजन्ति बहुतरपरितापम्
ये भजन्ति सच्चित्सुखरूपम् २

परमहंसगुरुफणितं गीतम्
ये पठन्ति निगमार्थसमेतम् ३



सुरुटिरागः आदितालम्

ब्रूहि मुकुन्देति, रसने
ब्रूहि मुकुन्देति ॥

केशव माधव गोविन्देति
कृष्णानन्द सदानन्देति १

राधारमण हरे रामेति
राजीवाक्ष घनश्यामेति २

गरुडगमननन्दकहस्तेति
खण्डितदशकन्धरमस्तेति ३

अक्रूरप्रिय चक्रधरेति
हंस निरञ्जन कंसहरेति ४

## चेतः श्रीरामं चिन्तय
## जीमूतश्यामम् ॥

अङ्गीकृततुम्बुरुसंगीतम्
हनुमद्गवयगवाक्षसमेतम् १

नवरत्नस्थापितकोटीरम
नवतुलसीदलकल्पितहारम् २

परमहंसहृद्गोपुरदीपम्
चरणदलितमुनितरुणीशापम् ३



## क्रीडति वनमाली, गोष्ठे
## क्रीडति वनमाली ॥

अजमक्षरमद्वैतमनन्तम्
ध्यायन्ति ब्रह्मपरं शान्तम् १

प्रह्लादपराशरपरिपाली
पवनात्मजजाम्बवदनुकूली २

परमहंसवरकुसुमसुमाली
प्रणवपयोरुहगर्भकपाली ३

जय तुङ्ग तरङ्गे, गङ्गे
जय तुङ्ग तरङ्गे ॥

कमलभवाण्डकरण्डपवित्रे
बहुविधबन्धच्छेदलवित्रे १

दूरीकृतजनपापसमूहे
पूरितकच्छपगुच्छग्राहे २

परमहंसगुरुफणितचरित्रे
ब्रह्माविष्णुशंकरनुतिपात्रे ३



॥श्रीः ॥

# ॥ नववर्णमाला ॥

ओंकारैकनिरूप्यं
पङ्कजभवनादिभावितपदाब्जम् ।
किंकरकैरवशशिनं
शंकरमेकं शिवं कलये ॥ १ ॥

ऐन्द्रं पदमपि मनुते
नैव वरं यस्य पदरजःस्पर्शात् ।
सान्द्रसुखोदधिमेकं
चन्द्रकलोत्तंसमीशमासेवे ॥ २ ॥

नागेशकृत्तिवसनं
वागीशाद्यैकवन्दिताङ्घ्रियुगम् ।
भोगीशभूषिताङ्गं
भागीकृतसर्वमङ्गलं नौमि ॥ ३ ॥

नगराजशिखरवासिन-
मगजामुखकुमुदकौमुदीनिकरम् ।
गगनशिरोरुहमेकं
निगमशिरस्तन्त्रविदितमवलम्बे ॥ ४ ॥

मन्दस्मितलसदानन-
मिन्दुकलोत्तंसमम्बिकासचिवम् ।
कंदर्पकोटिशतगुण-
सुन्दरदिव्याकृतिं शिवं वन्दे ॥ ५ ॥



मस्तक नम कमलाङ्घ्रिं
संस्तुहि भो वाणि वरगुणोदारम् ।
हस्तयुगार्चय शर्वं
स्वस्थो निवसामि निजमहिम्न्यमुना ॥ ६ ॥

क्लिन्नेक्षणमतिकृपया
संनुतमहिमानमागमशिरोभिः ।
तं नौमि पार्वतीशं
पन्नगवरभूषणोज्ज्वलकराब्जम् ॥ ७ ॥

शिशिरारुणकंजदृशं
शशिभूषणमेकमगसुताजानिम् ।
पशुपाशपाटनपटुं
वशिनं सर्वस्य देशिकं वन्दे ॥ ८ ॥

वटविटपिनिकटनिलयं
कुटिलजटाघटितहिमकरोदारम् ।
कटिलसितकरटिकृत्तिं
निटिलाम्बकमेकमालम्बे ॥ ९ ॥

वामाङ्ककलितकान्तं
कामान्तकमादिदैवतं दान्तम् ।
भूमानन्दघनं त-
द्धाम किमप्यन्तरान्तरं भाति ॥ १० ॥

यदपाङ्गितात्मबोधा-
त्पदमलभेऽखण्डितात्ममात्रमहम् ।
सदयं साम्बशिवं तं
मदनान्तकमादिदैवतं नौमि ॥ ११ ॥



सौस्नातिकममृतजलैः
सुस्मितवदनेन्दुसमुदितादिगन्तम् ।
संस्तुतममरगणैस्तं
निस्तुलमहिमानमानतोऽस्मि शिवम् ॥ १२ ॥

नववर्णरत्नमाला-
स्तुतिमेतामादिदेशिकेन्द्रस्य ।
धारयतः स्याद्भुक्तिः
सकलकलावाप्तिरथ परा मुक्तिः ॥ १३ ॥

इति सदाशिवब्रह्मेन्द्रविरचिता
**नववर्णमाला**
संपूर्णा ॥